# काव्यमार्गे शब्दवृत्तयः

## ड. बुद्धेश्वरषडङ्गी

## प्रबन्धसारः

*कस्यापि कार्यस्य कृते शक्तेर्महती आवश्यकता वर्तते। मनुष्ये यथा तत्त्वनिर्णयरूपस्य कार्यस्य कृते बुद्धिरूपा शक्तिः, गमने चरणयोः स्थानान्तरप्रापिता शक्तिः, करयोः उत्थापिका शक्तिः, दर्शनार्थं दृष्टिशक्तिरित्येवं विभिन्नकार्यार्थम् एकस्मिन् मनुष्ये विभिन्नाः शक्तयः सन्ति तथैव शब्देऽपि वर्तते अर्थप्रकाशनरूपकार्यार्थम् अभिधाद्या विविधाः शक्तय आलङ्कारिकैः स्वीकृताः। तासां विषये अस्मिन् प्रबन्धे विस्तरेण आलोचना विधीयते।*

शक्तिं विना कुतोऽपि मनुष्यात् किमपि कार्यं न सम्भवति । यथा तत्त्वनिर्णयरूपस्य कार्यस्य कृते बुद्धिरूपा शक्तिः, गमने चरणयोः स्थानान्तरप्रापिता शक्तिः, करयोः उत्थापिका शक्तिः, दर्शनार्थं दृष्टिशक्तिरित्येवं विभिन्नकार्यार्थम् एकस्मिन् मनुष्ये विभिन्नाः शक्तयः इव शब्दश्रवणात्परं नानाविधार्थोपस्थितिरूपकार्यार्थम् एकस्मिन् एव शब्दे विभिन्ना शक्तयः अवश्यमङ्गीकार्याः इति शास्त्रविदां सिद्धान्तः।

काव्यशब्दश्रवणात्परं च विविधानामर्थानाम् उपस्थितिरूपविविधकार्यं प्रति तेषु काव्यिकशब्देषु विभिन्नाः शक्तयः परिकल्पिताः । ते च विविधाः विजातीयाः अर्थाः अद्य यावत् चतुर्विधा इत्यङ्गीकृतमाचार्यैः । तत्र चतुर्थी शक्तिः तुरीयावृत्तिरिति कथ्यते । सा च व्यञ्जनापरपर्याया तुरीयावृत्तिः कविमार्गजुषां सहृदयानां हृदयकन्दरं नितरामतितरामाह्लादयति।

### अभिधा

पूर्वोक्तासु शक्तिषु शब्दश्रवणात् परं संकेतग्रहबलात् योऽर्थः प्रथमं प्रतीयते स हि मुख्यार्थापरपर्यायो वाच्यार्थः इति उच्यते। तदुपस्थापिका च शक्तिः वृत्तिर्वा “अभिधा”नाम्नी परिकल्पिता। तदुक्तं वाग्देवतावतारेण मम्मटाचार्येण –

स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते।[1]

तत्र च ‘स’ इत्यस्य व्याख्यानं तेनैवाचार्यप्रवरेण प्रोक्तं - तदेवं साक्षात्संकेतित एवार्थः मुख्यार्थः।[2] स एव नामान्तरेण वाच्यार्थ एव उच्यते । तदुपस्थापकश्चाभिधानामकव्यापार इति पूर्वोक्तकारिकया निर्णीतम्। संकेतग्रहश्च कोषाद्वा, व्याकरणाद्वा, मुख्यतया लोकव्यवहारादितो वा भवति । तदुक्तम् –

शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥

स एव शब्दव्यापारः कैश्चिद्व्यापारनाम्ना, कैश्चित् क्रियानाम्ना कैश्चिच्छक्तिनाम्ना, कैश्चिद् वृत्तिनाम्ना व्यपदिश्यते। अतः अभिधाव्यापारो नाम अभिधाशक्तिरित्यपि मन्तव्यम्। अभिधाव्यापारबोध्यः अर्थः मुख्योऽर्थः वाच्यार्थः, अभिधेयार्थः, सङ्केतितार्थः इति पर्यायवाचिभिः शब्दैः प्रसिद्धः ।

### तात्पर्यवृत्तिः

तदनन्तरं शब्दात् संकेतितार्थेषु उपस्थितेषु तेषां परस्परं सम्बन्धम् अन्वयं संसर्गं वा विना परिपूर्णवाक्यार्थबोधः नैव सम्भवति । स च सम्बन्धः अन्वयो वा संसर्गो वा शब्दातिरिक्ततया अर्थस्य एव मन्तव्यः । ईदृशार्थप्रतीतिरूपकार्यस्य कृते अपराऽपि काचन शक्तिः वृत्तिर्वा शब्दे अङ्गीकर्तव्यैव । सा च शक्तिः तात्पर्याख्या शक्तिः अभिहितान्वयवादमतानु-यायिभिः[3] स्वीक्रियते । तया च तात्पर्यवृत्त्या उपस्थितः अन्वयरूपः संसर्गरूपो वा अर्थः तात्पर्यार्थः इति। तात्पर्यवृत्तेः पर्यालोचनं कुमारिलभट्टमतावलम्बिना मतानुसारेणैव अलङ्कारशास्त्रे कृतमस्ति। प्रसङ्गस्यास्य आधारो भवति कुमारिलभट्टस्य श्लोकवार्तिकग्रन्थविशेषः। तत्र आचार्येण पर्यालोचि यत्–

साक्षात् यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।
वर्णास्तथापि नैतस्मिन् पर्यवस्यन्ति निष्फले॥
वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥[4]

पार्थसारथिमिश्रेणापि न्यायमालायामस्याः वृत्तेः पर्यालोचनमकारि। यथा - “अभिहितान्वय एव ज्यायान्। तथा च सूत्रकारः - अर्थस्य निमित्तत्वात् (पूर्वमीमांसादर्शनसूत्रम् - १/१/२५) इति व्यक्तमेव पदार्थनिमित्तकत्वं वाक्यार्थस्य दर्शयति। भाष्यकारोऽपि हि (शबरस्वामी) अमूनि पदानि स्वमर्थमभिधाय

---

[1] काव्यप्रकाशे - २/४

[2] तवाहि शब्दव्यापारात् योऽर्थोऽव्यवधानेन गम्यते सोऽर्थो मुख्यः। स हि यथा सर्वेभ्यः हस्तादिभ्योऽवयवेभ्यः पूर्वं मुखमवलोक्यते तथा सर्वेभ्यः (लक्ष्य-व्यङ्ग्य-तात्पर्यरूपेभ्यः) प्रतीयमानेभ्योऽर्थेभ्यः पूर्वमवगम्यते। (झलकीकरटीका-पृ.३९)

[3] अभिहितानां स्वस्ववृत्त्या पदैरुपस्थितानामर्थानामन्वय इति वादिनां भाट्टमीमांसकानामित्यर्थः। कुमारिलभट्टमता-वलम्बिनः मीमांसकाः अभिहितान्वयवादिनः इति ।

[4] श्लोकवार्तिक - २४२-२४३

निवृत्तव्यापाराणि, अथेदानीं पदार्था अभिहिताः सन्तो वाक्यार्थमवबोधयन्ति इत्याह"।

काव्यप्रदीपे प्रदीपकारेणापि व्याख्यायि - लाघवात् पदानां पदार्थमात्रे शक्तिः न त्वन्वयांशेऽपि, गौरवादन्यलभ्यत्वाच्च। तदंशो हि तात्पर्यार्थो वाक्याद्यर्थविलक्षणशरीरः आकांक्षायोग्यतासत्तिवशादपदार्थोऽपि प्रतीयते। न चापदार्थप्रतीतौ अतिप्रसङ्गः। स्वरूपसतः शक्यान्वयत्वस्य नियामकत्वात् इत्यभिहितान्वयवादिनां मतम्। (पृ.१७)

**लक्षणा**

अतः परं वाच्यार्थातिरिक्तः कश्चन विजातीयः अर्थोऽपि शब्दश्रवणात्परं प्रतीतिगोचरो भवतीति अनुभूयते यथा -"गङ्गायां घोषः" इत्युक्ते गङ्गापदात् भगीरथखातावच्छिन्नजलप्रवाहरूपवाच्यातिरिक्तं तटरूपार्थं विना प्रतीतेः पर्यवसानमेव न सम्पद्यते। तादृशस्य विजातीयार्थप्रतीतिरूपस्य कार्यस्य कृते शब्दे अभिधातिरिक्ता काचन विजातीयाऽपि शक्तिः अङ्गीकर्तव्या, सा च शक्तिर्लक्षणा नाम। तदुक्तं मम्मटाचार्येण –

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया॥[5]

अर्थात् शब्दश्रवणात्परं संकेतग्रहबलादुपस्थितेऽपि मुख्यार्थे तात्पर्यविषयीभूतान्वयानुपपत्त्या रूढिवशाद्वा प्रसिद्धिवशाद्वा प्रयोजनवशाद्वा मुख्यार्थेन सह नियतसम्बद्धः योऽर्थः प्रतीयते सोऽर्थः लक्ष्यार्थः इत्युच्यते। तदुपस्थापिका च शब्दस्यारोपिता[6] शक्तिर्लक्षणा नामेति संक्षेपेण मन्तव्यम्।

**व्यञ्जनावृत्तिः/तुरीयावृत्तिः**

अतः परं वाच्यार्थ-तात्पर्यार्थ-लक्ष्यार्थातिरिक्तः अन्यविधोऽपि कश्चिदर्थः काव्यवाक्येभ्यः लौकिकवाक्येभ्यश्च प्रतीतिगोचरतामायाति। सोऽर्थः प्रतीयमानार्थः इत्युच्यते । स एव प्रतीयमानार्थ : व्यङ्ग्यार्थनाम्ना ध्वन्यादिनाम्ना च व्यपदिश्यते। साहित्यदर्पणकारः अस्याः 'रसना' इति नवीनं नाम कल्पयति। यथा –

सा चेयं व्यञ्जना नाम वृत्तिरित्युच्यते बुधैः।
रसव्यक्तौ पुनर्वृत्तिं रसनाख्यां परे विदुः॥[7]

स च प्रतीयमानोऽर्थः प्रागुक्तेभ्यो वाच्यादिभ्यः त्रिविधेभ्य : अर्थेभ्य :विजातीयः पृथग्भूत एव । स च प्रतीयमानार्थः क्वचिद्वस्तुरूपः, क्वचिदलङ्काररूपः, क्वचिच्च रसादिरूपः इति स्थूलतः त्रिविधः अनुभूयते।

भ्रम धार्मिक विस्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन॥

इति पद्यात् भ्रमेति भ्रमणविधिरूपे वाच्यार्थे प्रतीतौ गोदावरीतटे न भ्रमेति, योऽर्थः प्रतीयते स च वाच्यार्थो भवितुं नार्हति।[8] वाच्यार्थो हि नियततया सङ्केतितार्थ एव भवति । अत्र च पद्ये भ्रमेति पदं 'न भ्रम' इत्यर्थे न सङ्केतितम्। तात्पर्यार्थस्य च नियततया संसर्गरूपत्वात् न भ्रमेत्यस्य च तद्रूपताभावात् नासौ तात्पर्यार्थः इत्यपि वक्तुं शक्यते। मुख्यार्थबाधाद्यभावात् लक्षणायाः प्रसरासम्भवात् लक्ष्यार्थरूपोऽपि न भवितुमर्हति।[9] अतः न भ्रमेति प्रागुक्तत्रिविधार्थविलक्षणः पृथगेवेति मन्तव्यम्। एवं –

"जलकेलितरलकरतलमुक्तपुनःपितहराधिकावदनः।
जगदवतु कोकयुनो विघटनसंघटनकौतुकी कृष्णः॥" इत्यस्मात् पद्यात् "राधिकावदनं चन्द्रः" इत्येवम्भूतः योऽर्थः प्रतीयते स हि रूपकालङ्काराख्यः सोऽपि प्रगुक्तत्रिविधार्थविलक्षणः तेभ्यः पृथगेवेत्यनुसन्धेयः।[10] एवं च

"शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकमालोक्य गण्डस्थलीं
लज्जा नम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥" इत्यस्मात् पद्यात् य : लोकोत्तरानन्दमयः शृङ्गाररसः प्रतीयते सोऽपि शब्दभिन्नतया अर्थरूप एव। न चासौ वाच्यलक्ष्यतात्पर्यार्थेषु अन्तर्भवितुमर्हति। तदुक्तं वाग्देवतावतारैः मम्मटपादैः - "रसादिलक्षणस्त्वर्थ : स्वप्नेऽपि न वाच्यः, ...... मुख्यार्थभावाद्यभावान्न पुनर्लक्षणीयः। तेनासौ व्यङ्ग्य एव।[11]

इदमत्रावलोकनीयं शब्दात् यः कोऽप्यर्थः प्रतीयते सः शक्तिं विना न प्रतीतिगोचरीभवितुमर्हति। अत : प्रतीयमानत्वेन प्रतिपादितस्य अर्थस्य वाच्यलक्ष्यतात्पर्यार्थेभ्य: विलक्षणतया पृथक्तया च अभिधातात्पर्यलक्षणानामकशक्तिबलाच्च न प्रत्येतुं शक्यते । अतः तत्प्रतीत्यर्थमपरा काचन शक्तिः वृत्तिर्वा अवश्यमङ्गीकर्त्तव्या । सा च व्यञ्जनाशक्ति : तुरीयावृत्तिर्वा नामेति स्थूलतया निष्कर्षः ।

## सहायकग्रन्थसूची


- काव्यप्रकाशः – व्याख्या. सत्यव्रतसिंहः, चौखम्बा विद्याभवन, वाराणसी, २००३


[5] काव्यप्रकाशः - २/९ ६

[6] आरोपिता= आरोपिता तथा च क्रिया न लक्षणघटके पदे; अपि तु स्वरूपकथनपरे स्तः। आरोपिता = मुख्यार्थव्यवहितलक्ष्यार्थविषयकत्वात् शब्दे कल्पिता। साक्षात्सम्बन्धेन मुख्यार्थनिष्ठा परम्परासम्बन्धेन तु शब्दनिष्ठा लक्षणा ।

[7] साहित्यदर्पणे - ५/५

[8] नाभिधा समयाभावात (काव्यप्रकाशे- २/१५)

[9] हेत्वाभावान लक्षणा (काव्यप्रकाशे-२/१५)

[10] अलङ्कारध्वनिः

[11] काव्यप्रकाश: - व्यायस्य विध्यनिरूपणावसरे पञ्चमोल्लासे- प्र.२१७

- काव्यप्रकाशः – झलकीकरटीका, चौखम्बा पाब्लिसिं हाउस्, नईदिल्ली, १९९५
- साहित्यदर्पणः – व्याख्या. आचार्यः कृष्णमोहनशास्त्री, चौखम्बा संस्कृत संस्थान, वाराणसी, १९८५
- रसगङ्गाधरः – अनु. सूर्यमणिरथः, ओडिशा साहित्य अकादेमी, भुवनेश्वर, १९९०
- मीमांसाश्लोकवार्तिकम् – काशिकाख्यटीका – महामहिमश्रीसेतुलक्ष्मीमहाराज्ञीशास्त्र, १९२६